# Shri Narmada Stotram Mantragarbha

# શ્રીનર્મદાસ્તોત્રમ્ મન્ત્રગર્ભ

## Document Information

Text title : shrinarmada Stotram Mantragarbha

File name : narmadAstotrammantragarbha.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI, mantra

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2022

*sanskritdocuments.org*

# શ્રીનર્મદાસ્તોત્રમ્ મન્ત્રગર્ભ

વારિતાઽનર્થસઙ્ઘા યા અનન્ય નતમુક્તયે ।
સુષ્ટુશર્મનિદાનાયૈ નદ્યૈ પુમ્મોહસંહૃતે ॥ ૧॥

દેવર્ષિ દાનવેડ્યાયૈ સૂક્ષ્મવસ્તુદૃશે નમઃ ।
વાક્યાર્થાયૈ સોમપુત્ર્યૈ યાતનાઽનલશાન્તયે ॥ ૨॥

નન્દાયૈ નર્મદાયૈ તે ત્રિધાકર્મવિશુદ્ધયે ।
દયાદમઃ સ્થૈર્યકર્ત્ર્યૈ સંસિદ્ધ્યૈ દેવતાત્મને ॥ ૩॥

સત્યસમ્પ્રાપ્તિકારિણ્યૈ ભૂત્યૈ સન્તુષ્ટિહેતવે ।
રમ્યાયૈ તત્ત્વરૂપિણ્યૈ તપસ્વ્યભ્યં તરાત્મને ॥ ૪॥

સ્વચ્છ સ્વર્નદ્યધિસ્વામ્બુ દમિત ત્રાસિભીતયે ।
તીવ્રશર્મહૃતે પુંહૃત્તાપઘ્ને હિતકીર્તયે ॥ ૫॥

કૃતાપદાવિમોક્ષાયૈ ત્રેધાધર્માઙ્ગમૂર્તયે ।
તપોદા યૈ તપઃસિદ્ધ્યૈ યજ્ઞાઙ્ગ્યૈ વિષભીહૃતે ॥ ૬॥

રેવાયૈ નરતાપઘ્ન્યૈ દિવ્યાયૈ ષડ્દ્વિષદ્ધૃતે ।
વાસનામોક્ષદક્ષાયૈ ગઙ્ગાયૈ સત્યકીર્તયે ॥ ૭॥

સ્તુતાયૈ નિત્યદીપ્તાયૈ બલિસર્પદદુદ્ધૃતે ।
તિતિક્ષુ શિવસન્ધાત્ર્યૈ રત્યૈ ચેતઃ સમાધયે ॥ ૮॥

જય જય શિવકન્યે નર્મદે શર્મદે ત્વં
    જય જય જનમાન્યે ધર્મદેઽધર્મદે ત્વમ્ ।
જય જય સુવદાન્યે ધર્મદે કર્મદે ત્વં
    જય જય ભુવિ ધન્યે ભર્મદે વર્મદે ત્વમ્ ॥ ૯॥

મન્ત્રાદ્યાક્ષરસહિત -
    નર્મદાયૈ નમઃ પ્રાતર્નર્મદાયૈ નમો નિશિ ।

નમોઽસ્તુ નર્મદે તુભ્યં ત્રાહિ માં વિષસર્પતઃ ॥

વા રિતાડ ન ર્થસઙ્ઘા યા અ નન્ય ન તમુક્તયે ।
સુ ષ્ટુશ ર્મ નિદાનાયૈ ન ઘૈ પું મો હસંહૃતે ॥ ૧॥

દે વર્ષિ દા નવેડ્યાયૈ સૂ ક્ષ્મવ સ્તુ દૃશે નમઃ ।
વા ક્યાર્થા યૈ સોમપુત્ર્યૈ યા તનાડ ન લશાન્તયે ॥ ૨॥

નં દાયૈ ન ર્મદાયૈ તે ત્રિ ધાક ર્મ વિશુદ્ધયે ।
દ યા દ મઃ સ્થૈર્યકર્ત્ર્યૈ સં સિદ્ધ્યૈ દે વતાત્મને ॥ ૩॥

સ ત્ય સં પ્રા પ્તિકારિણ્યૈ ભૂ ત્યૈ સં તુ ષ્ટિહેતવે ॥

ર મ્યાયૈ ત ત્ત્વરૂપિણ્યૈ ત પસ્વ્ય ભ્યં તરાત્મને ॥ ૪॥

સ્વ ચ્છ સ્વ ર્ન ઘધિસ્વામ્બુ દ મિત ત્રા સિભીતયે ।
તી વ્રશ ર્મ હૃતે પુંહૃ ત્તા પદ્મ્યે હિ તકીર્તયે ॥ ૫॥

કૃ તાપ દા વિમોક્ષાયૈ ત્રે ધાધર્ માં ગમૂર્તયે ।
ત પોદા યૈ તપઃસિદ્ધ્યૈ ય જ્ઞાઙ્ગ્યૈ વિ ષભીહૃતે ॥ ૬॥

રે વાયૈ ન રતાપઘ્ન્યૈ દિ વ્યાયૈ ષ ડ્દ્વિષદ્ધૃતે ।
વા સના મો ક્ષદક્ષાયૈ ગં ગાયૈ સ ત્યકીર્તયે ॥ ૭॥

સ્તુ તાયૈ નિ ત્યદીપ્તાયૈ બ લિસ ર્પ દદુદ્ધૃતે ।
તિ તિક્ષુ શિ વસન્ધાત્ર્યૈ ર ત્યૈ ચે તઃ સમાધયે ॥ ૮॥

જય જય શિવકન્યે નર્મદે શર્મદે ત્વં
જય જય જનમાન્યે ધર્મદેઽધર્મદે ત્વમ્ ।
જય જય સુવદાન્યે ધર્મદે કર્મદે ત્વં
જય જય ભુવિ ધન્યે ભર્મદે વર્મદે ત્વમ્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીનર્મદાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Narmada Stotram Mantragarbha*

pdf was typeset on December 23, 2022

Please send corrections to *sanskrit@cheerful.com*